No. १०५६ क

Title मन्यु सूक्त विधानं पंचदश: पटल:

Author

Extent ४३ पत्र Age शक १८०४.

Subject तन्त्र

मन्युसूक्तविधानपंचदशाःप[illegible]ः

नं० १०५६








श्रीमन्माहाराजाधिराज राम सिंह वहादुर.







# 5524
F 43
Complete
[illegible]

श्रीगणेशायनमः॥ अस्मद्विद्यागुरूभ्यो नमः॥ मार्कंडेय महा

प्राज्ञ मुनि शार्दूल सुव्रत व्रतसर्वं विजानासी विज्ञाप्यः ह्य-

स्तिमे प्रियं ॥१॥ विज्ञापनीय आद्यहं समा चक्ष्वा ममानघ॥

जितोहं दस्युभिः क्रूरैः त्यक्तं राज्यं मयानघ ॥२॥ कोशो बलं

चाप हतं विसृष्टोहं वनं प्रती॥ कागतिर्मुनि शार्दूल केनसौ

ख्यं भविष्यती॥३॥ मार्कंडेयउवाच॥ अस्ति गुह्य तमो राजन्

सर्व शत्रु निबर्हणं॥ राज्यदं राज्य कामानां अधनानां धन प्रदं

॥४॥ राजा प्रसन्नः सद्यस्तु राज्य सन्मान मिच्छता॥ पंयंका

मयते मर्त्यः तंतमाप्नोति निश्चितं ॥५॥ तस्मादहंते वक्ष्यामी
शृणु पार्थिव सत्तम् ॥ पुरातु नैमिशारण्ये मुनयः संश्रितव्रताः ॥
६॥ नारदं परिपप्रच्छुः दस्युबाधा विनाशनं ॥ नारदउवाच ॥
शृणुध्व ऋषयः सर्वे पुरात्रेतायुगे तथा ॥ देवदारइति ख्याता
सूर्यवंश समुद्भवः ॥ सजितः शत्रुभिर्दुःखी नैमिशारण्य-
मायया ॥ व्यासोक्तं नारद प्राह मन्युकल्पं यथाविधी ॥८॥
कथं कार्यमितिप्राह मौनि संप्राह नारदः सौवर्णे रजते वा
पी ताम्रेवा तंडुले पिवा ॥९॥ वृत्तं त्रिकोणं षट्कोणं वृत्तद्वयस
मन्वितं ॥ बहिः षोडशभिर्युक्तं दलैः स्तेषु लिखेत्ततः ॥१०॥

भूपुरद्वय संयुक्तं चतुर्द्वारोप शोभितं ॥ वृत्त मध्ये साध्यना
म रूपुनाम विलोमतः ॥११॥ आग्नेयाग्नि लिखे न्मंत्रं त
द्भागं कोणषट्कगे ॥ दळेषु मंत्र राजंच प्रणवंचाष्ट दिक्षुच
॥१२॥ इंद्रादींश्च ततोप्यष्टा भैरवांश्च समा लिखेत् ॥ अष्ट
दिग्गज नामानी चतुर्द्वारे लिखेत् क्रमात् ॥१३॥ एवं विलिख्य
मन्योश्च चक्रराज मतंद्रतं ॥ आचम्य प्राणानायम्य ॥ देशका
लौसंकल्प्य ॥ कृत्वाचक्रस्य पूजनं ॥ चक्र प्राण प्रतिष्ठांकृत्वा षोड
शोपचारैः संपूज्य ॥ चक्रराजं समभ्यर्च्य पुरश्चरण मारभेत्

एवंगुणेत्यादि शुभ तिथौ मम समस्त शत्रु निबर्हणार्थे आत्म
संरक्षणार्थे मन्युदेवता प्रीत्यर्थे मूलमंत्रजपं करिष्ये॥
अस्यश्री मन्युसूक्त महा मंत्रस्य तापस मन्यु ऋषिः मन्युर्देवता
त्रिष्टुप छंदः अपनिलयंतामितिबीजं॥ संसृष्टं धन मितिशक्तिः
उभयं समाकृत मिति कीलकं मम समस्त शत्रु निवारणा
र्थं आत्मसंरक्षणार्थं जपे विनियोगः॥ संसृष्टंधनमुभयं अंगुष्ठा
भ्यांनमः हृदयायैनमः॥ समाकृत मस्मभ्यं तर्जनीभ्यांनमः
शिरसेस्वाहा॥ दत्तांवरुणश्चमन्युः मध्यमाभ्यांनमः शिखायै
वौषट्॥ भियंदधानाहृदयेषु अनामिकाभ्यांनमः कवचायहुं॥

शत्रवः पराजितासः कनिष्ठिका भ्यां नमः नेत्रत्रयायै वौषट् ॥
अप निलयंताम् करतलकर पृष्ठाभ्यां नमः अस्त्रायफट् ॥
भूर्भुवस्वरो मिति दिग्बंधः ॥ अथ ध्यानं ॥ ज्वलनार्क प्रतीका
शं घंटा मंडलु मंडितं ब्रम्ह श्रीया विराजंतं दीप्यमान मुखां
बुजं ॥१॥ पद्मासने सुखासीनं ध्यायंतं ध्यान मुद्रया ॥ ध्यायेत
त्तापसंमन्यू मनोभिष्ट वर प्रदं ॥२॥ दंष्ट्रा कराळ वदनं ज्वाला
माला शिरो रुहं ॥ कपाल कृत्तिका हस्तं रुद्रं मन्युं नमाम्यहं ॥३॥
वज्र कल्पं त्रिनयनं सर्व शत्रु निषूदनं ॥ द्वात्रिंशदायुधैर्युक्तं-

मन्यु
कल्प:
3

पार्वत्या सहितं शिवं ॥४॥ वज्रहस्ते पसव्येरमिति करकरे संदधा ॥३॥
ना समस्तैर्देवैः संसेव्य मानो भृश ममृतरसा पूरितं पूर्णकुंभं ॥५॥
आलोला वापि तृप्ती निज भजन परं पातुमां बद्ध तृष्णां पाया-
न्माम पदद्वैरसुर कुल रूपुर्मन्यु रूपी महेंद्रः ॥५॥ इतिध्यात्वा
लं पृथिव्या त्मकायै गंधं समर्पयामी ॥ हं आकाशात्मकायै पुष्पं
समर्पयामी ॥ यं वायव्यात्मकायै धूपं समर्पयामी ॥ रं अग्नि
यात्मकायै दीपं दर्शयामी ॥ वं अमृततत्वात्मकायै अमृतनैवे
द्यं समर्पयामी ॥ सं सर्व शक्त्यात्मकायै सर्वोपचार पूजां स
मर्पयामी ॥ गुरुर्ब्रम्हा गुरुर्विष्णु गुरुरेवमहेश्वरः गुरुःसाक्षा

त् परब्रम्ह तस्मै श्री गुरवेनमः ॥१॥ श्रीमच्चिदानंद गुरवेनमः ॥ अस्मत् विद्या गुरुभ्योनमः ॥ इति गुरुध्यानं ॥
तदनंतरं मूलमंत्रजपं ॥ नित्यं अष्टोत्तर शतं जप्त्वा ॥ मंत्रसिद्ध्यर्थं लक्ष पुनश्चरणं ॥ मूलमंत्रजपानंतरं भूर्भुवस्वरोमिति दिग्विमूखः ॥ पूर्वाभिमुखं मंत्रानुष्ठानं कुर्यात् ॥ शत्रु पराजय कालेउत्तराभिमुखं मंत्र पुनश्चरणं ॥ व्याघ्राजिन श्रेष्ठासनं
जप दशांश भाग मूल मंत्रेण होमं ॥ होम दशांश भाग तर्पणं तद्दशांश भाग ब्राम्हण भोजनं ॥ इति त्रिविधं मूलमंत्रेण कुर्यात् ॥ ॥ ॥

अथ पुनश्चरण विधी ।। कलश स्थापन विधि लिख्यते ।। 

एवं गुणेत्यादि शुभ तिथौ मम सर्वाभिष्ट सिध्यर्थं मन्युदेवता मुद्दिश्य मन्युदेवता प्रीत्यर्थं रुद्र यामिळोक्त प्रकारेण कलश पूजा अंग पूजां आवरण पूजां यंत्र पूजा सहित अंगन्यास करन्यासादिकं मन्यु सूक्त पारायणं अन्योन्य सहायेन यजमान युक्ताः करिष्यामः ।। आदौ भूमिं प्रार्थयेत्

स्योना पृथिवी भवा नृक्षरः निवेशिनी यच्छानःशर्मसप्रयाः ।। विष्णुशक्ति महद्भूते शंखवर्णा मही तले ।। अनेक रत्न संभूते भूमिदेवी नमोस्तुते ।। इति भूमीं प्रार्थयेत् ।।

कूर्मासनं परिकल्प्य ॥ शोषण दहन प्लावन पिंडीकरण देह संस्थापना न्यहं करिष्ये ॥ अथ प्रयोगार्णवे मन्यु सूक्त पुनश्चरण विधिरुच्यते ॥ ग्रामाद्बहिः नदीतीरे तटाक समीपे वा अश्वत्थ सन्निधौ देवायतने वा स्वगृह मध्ये कार्यं तत्र गोमयेनोप लिप्यंते रंगवल्यादीन् रच यित्वा तत्र फलपुष्प पल्लव वस्त्र सहित मंटपं कारयित्वा तन्मध्ये माषः तिल चणक आढक व्रीही गोधूमादि धान्यं निक्षिप्य तत्रः सुवर्णे वा रजते वा ताम्रे वा पूर्ण कलशं

मन्यु कल्प 5

॥५॥

धान्योपरी उपविश्य॥ आत्म संरक्षणार्थे सूवर्ण कलशं महा
शत्रु क्षयार्थं सूवर्णकलशं॥ रोगनिवृत्यर्थं रजतकलशं॥
स्तंभन मोहन विद्वेषणादि कार्ये त्रिविध कलशं स्थापयेत्॥
पंचरत्नानी पंच पल्लवानी पंचगव्यानी पंचामृतानी नव
तंतून् दूर्वान् पुण्यतीर्थानी तत्तन्मंत्रैः निक्षिप्य नवरक्त-
वस्त्र युग्मेन कलशाच्छादय॥ अंगुष्ठ मात्र प्रमाणं म-
न्युमूर्त्तीं ध्यान श्लोकानुसारे स्वर्ण रूपं कारयित्वा अ
ग्नितप्त ताडणदोष परिहारार्थं अग्निः सप्तमिति सप्त
ऋग्भिः पंचगव्येन पंचामृतेन स्नापयित्वा॥ पूर्वोक्त यं

त्र मध्ये एनत्कलशं मूर्त्तीं स्थापयित्वा॥ कलशस्योपरी पू-
र्णनारीकेल फलं निक्षिप्य ततः पीठ पूजां कूर्यात्॥ ऐं -
कामगिरि पीठां पादुकां पूजयामी॥ क्लीं जालंधर पादुकां
पूजयामी॥ सौः पूर्णगिरीपादुकां पूजयामी॥ संसृष्टंमिति
कूर्चेन पंचवारं मार्जयेत्॥ अष्टवारं पूरकं॥ द्वादशावारं कुं
भकं कृत्वा॥ सं श्रीं प्रबुध्दां कुंडलिनीं उथाप्य मूलाधारं -
त्रिः प्रदक्षिणां कृत्वा ब्रम्हरंध्रस्थदेवं तत्कोट विडंबनं सर्वाभ
रण भूषितांगं छत्रचामर सपरिवारं अधिदेवता प्रत्यधिदे-

वता सहितं सशक्ति सपुत्रा सांग आवरण देवता सहितं वामना
सापुटा मुख मार्ग विनिर्गतं ॥ पंचवर्ण रंगवल्यो परी विरचित सिं
हासनस्थं नव धान्यो परी निक्षिप्ता कलशस्य युग्म नव ताम्र पल्ल
व सहित नारीकेळस्यो परी मन्यु मूर्त्तीं आवाह्य ॥ अस्य श्रीम
न्युदेवता कलश प्राण प्रतिष्ठा महा मंत्रस्य मार्कंडेय मेधा
दक्षिणा मूर्त्ती ऋषयः ऐं बीजं क्लीं शक्तिः सौः कीलकं -
ममाभिष्ट काम्यार्थ सिध्यर्थे प्राण प्रतिष्ठापन मंत्रजपे
विनियोगः ॥ ह्रां अंगुष्ठाभ्यां नमः हृदयायै नमः ह्रीं तर्जनी
भ्यां नमः शिरसे स्वाहा ॥ ह्रुं मध्यमाभ्यां नमः शिखायै वौ

षट् ह्रैं अनामिकाभ्यांनमः कवचायहुं॥ ह्रौं कनिष्ठि

काभ्यांनमः नेत्रत्रयायवौषट्॥ ह्रः करतलकर पृष्ठा

भ्यांनमः अस्त्राय फट्॥ भूर्भुवस्वरोमिति दिग्बंधः॥

अथ ध्यानं॥ रक्तांबोधीस्थपोतो ल्लसदरुण सरोजाधिरू

ढाः कराब्जैः पाशं कोदंड मिक्षु भवगण गुण मप्यंकुशं चाप

बाणैः॥ बिभ्राणा सृक्कपालं त्रिनयन विलसत् पीनवक्षो

रुहाढ्यैः देवीबालार्क वर्णा भवतु सुखकरी प्राण शक्तिः प-

रान्नः॥१॥ ॐ आं ह्रीं क्रूं यरलवशषसहोंक्रों ह्रीं आं

आसुनेते पुनरस्मासु चक्षुः पुनःप्राणामिहनो धेहि भोगं जोक् पश्यमा सूर्यमुचरंतं अनुमते मृडयानस्वस्तीः अमृतं वै प्राणा अमृतमापः प्राणानेव यथास्थानं उपःह्वयते ॥ आवाहितो भव ॥ स्थापितो भव ॥ सन्निहितो भव ॥ सन्निरिद्धो भव ॥ सम्मुखो भव ॥ शांतो भव ॥ वरदो भव ॥ मम सर्वाभिष्ट वरदो भव ॥ श्रीमन्युदेवता प्राण प्रतिष्ठापन मुहूर्त्तं सुमुहूर्त्तो इत्यनु गृण्हंतु ॥ सुमुहूर्त्तोस्तु ॥ कुसुमाक्षतां गृहित्वा आवाहनादि षण्मुद्रां प्रदर्श ॥ पाशांकुश संपुटित भुवनेश्वरीं षोडश स्वरांश्च पृथिव्यापस्तेजो वायुराकाशा-

पंच भूता बीज सहित चतुर्विंशती तत्वसहित प्राण प्रति

ष्ठापनं कृत्वा ॥ षोडशोपचारैः संपूज्य ॥ शंख चक्र खड्ग खे-

चर बाण मुसल पद्म खंड योनी महा त्रिखंड योनी सुर

भि ऋषी मुद्रा नाराच भूचरी खेचरी चतुर्दश मुद्रां प्रद

र्श ॥ अत्युग्र मूर्ती रुद्रंच पंचाननं चंद्र तुषारवर्णं ॥ उमा

सखं भुजंग भूषणं ॥ सुनीलकंठं हृदि भावयामी ॥ इति-

कलश प्रार्थना: ॥ गं गणपतये नमः ॥ क्षीं क्षेत्रपालायैन

मः ॥ पूर्वद्वारेविं वीरभद्रायैनमः ॥ चं चंडभैरवायैनमः ॥

मन्यु
कल्पः
४

दक्षिणद्वारे शं शर्वायैनमः ॥ ऊं उन्मत्त भैरवायैनमः ॥ पश्चिम
द्वारे मं महास्मायैनमः वं वटु भैरवायैनमः ॥ उत्तरद्वारे गं ग
णपतयेनमः महादेव्यैनमः ॥ अथ अष्टदिग्गजं पूजयेत् ॥
ऐरावतायैनमः ॥ पुंडरीकायैनमः ॥ वामनायैनमः ॥ कुमुदाये
नमः ॥ अंजनायैनमः ॥ पुष्पदंतायैनमः ॥ सार्वभौमायैन
मः ॥ सुप्रतीकायैनमः ॥ दिग्गजायैनमः ॥ तक्षकायैनमः
वासुकिनेनमः ॥ पद्मायैनमः ॥ पुंडरीकायैनमः ॥ शेषाये
नमः ॥ अनंतायैनमः ॥ धृतराष्ट्रायैनमः ॥ कर्कोटकायैन
मः ॥ इत्यष्टनागान् पूजयामी ॥ ज्वलत् पावक संकाशं

वज्र हस्तं चतुर्भुजं ॥ शत्रुवश्यकरं मन्युं ध्यायेदिष्टार्थ-
सिद्धये ॥१॥ दंष्ट्राकरालवदनं ज्वालामाला शिरो रुहं ॥
कपाल मौक्तिक धरं रुद्रं मन्युं नमाम्यहं ॥२॥ एवं त्रिवारंध्या
त्वा ॥ कलशोदकेन यागोपकरणीं आत्मानं संप्रोक्ष्य ॥
आवरण पूजांकृत्वा ॥ आधारशक्त्यैनमः ॥ कूर्मायैनमः
वराहायैनमः ॥ अनंतायैनमः ॥ क्षीरसागरायैनमः ॥ श्वे
तद्वीपायैनमः ॥ कल्पवृक्षायैनमः ॥ सुवर्ण मंटपायैनमः
वेदिकायैनमः ॥ रत्नसिंहासनायैनमः ॥ आग्नेयकोण॥

मन्यु दारभ्य ॥ धर्मायैनमः ॥ अधर्मायैनमः ॥ ज्ञानायैनमः ॥ वैराग्या ॥१॥
कल्पः यैनमः ॥ विद्यातत्वायैनमः ॥ कलातत्वायैनमः ॥ कंदायैनमः ॥
१
नाळायैनमः ॥ पत्रेभ्योनमः ॥ केसरेभ्योनमः ॥ कर्णिकायैनमः
कर्णकामध्येसूर्य मंडलायैनमः ॥ सूर्यमंडलाधिपतये सोम
मंडलायैनमः ॥ सोम मंडलाधिपतये वन्हि मंडलायैनमः ॥
वन्हि मंडलाधिपतये ब्रम्ह मंडलायैनमः ॥ ब्रम्ह मंडलाधि-
पतये विष्णु मंडलायैनमः ॥ विष्णुमंडलाधिपतये शिव
मंडलायैनमः ॥ शिव मंडलाधिपतये शक्तिमंडलायैनमः
कमल पत्रेषुलक्ष्म्यैनमः ॥ सरस्वत्यैनमः ॥ महत्यैनमः ॥ रत्यै

नमः ॥ तुष्ट्यै नमः ॥ पुष्ट्यै नमः ॥ मध्ये मन्युमूर्त्तये नमः ॥ इति संपूज्य ॥ अथ पूजाविधिः ॥ यस्ते मन्यु विधद्वज्र सायका सह वोजः पुष्यती विश्व मानुषक् साह्या मदासमार्यत्वया युजा सहस्कृतेन सहसा सहस्वता ॥ आवाहनं समर्पयामी ॥ मन्युरिंद्रो मन्युरेवासदेवो मन्युर्होता वरुणो जातवेदाः मन्युं विशाईळते मानुषीर्याः पाहिनो मन्यु तपसा सजोषाः ॥ आसनं समर्पयामी ॥ अभीः मन्यु तपसस्तवीयान तपसा युजा- विजहि शत्रून् अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या

मन्यु
कल्पः

10

मरुत्वन्नाः पाद्यं समर्पयामी ॥ त्वं हि मन्यू अभिः भूत्योजास्व ॥१०॥

यं भूर्भिमो अभिमातिषाहः विश्वचर्षणिस्सहुरिस्सहावान-

स्मान्स्वोजः पृतनासु धेहि ॥ अर्घ्यं समर्पयामी ॥ अभागस्स

न्नाप परेतो असिम तव क्रत्वा तविषस्य प्रचेतः तं त्वा मन्यो

अक्रतुर्जहीळाहं स्वातनूर्बलदेयाय मेही ॥ आचमनं समर्प

यामी ॥ अयं ते अस्म्युपमेह्यर्वाङ् प्रतीचीनस्सहुरे विश्वधायः

मन्यो वज्रिं नभिमामाव वृत्स्वाहनाव दस्यूनृतपो ध्यापेः

स्नानं समर्पयामी ॥ आप्यायस्वेति पय स्नानं समर्पयामी ॥

दधिक्रावणोतिदधिस्नानंसमर्पयामी।। शुक्रमसीती
आज्यस्नानंसमर्पयामी।। मधुवाताइतिमधुस्नानं
समर्पयामी।। स्वादुःपवस्वेतिशर्करास्नानंसमर्पयामी
याःफलिनी रितिफलोदकस्नानंसमर्पयामी।। आपोहि
ष्ठेति सिद्धोदकस्नानंसमर्पयामी।। श्रीसूक्तेन अभिषे
कं कूर्यात्।। अभिप्रेही दक्षिणतो भवा मेधा वृत्राणी जंघना
वभूरी जुहोमिते धरुणं मघ्वो अग्र उभाउ पांशुः प्रथमा
पिबावा।। रक्तवस्त्र युग्मंसमर्पयामी।। त्वयामन्योसर

मन्यु कल्प ॥

यमारुजंतो हरुषमाणा मो धृषिता मरुत्वः तिग्मेषवा आ ॥११॥

युधा संशिशाना अभिप्रियंतो नरो अग्निरूपाः ॥ यज्ञोपवी

तं समर्पयामी ॥ अग्नि रिव मन्यो त्विषितः सहस्वा सेनानी

र्नः स्सहुरे हूतये धिहत्वाय शत्रून् ॥ विभजस्व वेद वो जो वि

मानो विमृधो नुदस्वा ॥ आभरणं समर्पयामी ॥ सहस्व

मन्यो अभिमाति मस्मे रुजन्मृणन् प्रमृणन् प्रेहिश

त्रून् ॥ उग्रं ते पाजो नन्वारुरुध्रे वशीवशं नयस एकज

त्वं ॥ गंधं समर्पयामी ॥ एको बहूनामसि मन्यवीळितो

विशं विशं युधये सं शिशाधी ।। अक्रुत्त क्रुत्त्वया युजा ·
वयं द्युमंतं घोषं विजयाया क्रुण्महे ।। अक्षतां समर्पया ·
विजेष क्रुदिंद्रा इवानव ब्रवो अस्माकं मन्यो अधिपाभ
वेहा ।। प्रियंतेनाम सहुरे गृणी मसि विद्मात मुत्सं यत आ
बभूथा ।। पुष्पाणि समर्पयामी ।। आभूत्या सहजा वज्र
सायक सहो बिभर्ष्यभि भूत उत्तारं क्रुत्वा नो मन्यो सह मे
द्येधि माहाधनस्या पुरुहूत संसृजी ।। धूपं समर्पयामी ।।
संसृष्टं घन मुभयं समाक्रुत मस्मभ्यं दत्तां वरुणश्च मन्युः

मन्यु
कल्प
12

श्रियं दधाना हृदयेषु शत्रवः पराजितासो अपनिलयंताम् ॥ ॥१२॥

नैवेद्यं समर्पयामी ॥ पूगीफल मिति तांबूलं समर्पयामी ॥

हिरण्य गर्भ मिति सुवर्ण पुष्पं समर्पयामी ॥ संसृष्टं धनमुभ

य मिति नीराजनं समर्पयामी ॥ श्रीसूक्तेन मंत्र पुष्पं ॥ मूल

मंत्रेण प्रदक्षिणां समर्पयामी ॥ मूलमंत्रेण नमस्कारं ॥ मूल

मंत्रेण देवता प्रार्थना ॥ कर्णिकायां वृत्त मध्ये ॥ तपोमूर्त

ये मन्यु देवतायै पुष्पांजलिं संपूज्य ॥ चक्रस्योपरी वृत्तस्यो

परी स्थिता प्राग्यष्ट दिक्षु ऋषीन् पूजयेत् ॥ पूर्वे कश्यपा

यैनमः॥ आग्नेयां अत्रेनमः॥ दक्षिणे भरद्वाजायैनमः
नैर्ऋत्यां विश्वामित्रायैनमः॥ पश्चिमे गौतमायैनमः
वायव्यां जमदग्नेनमः॥ उत्तरे वशिष्ठायैनमः॥ ईशान्यां
कपिलायैनमः॥ इति प्रथमावरण पूजा॥ चक्रस्य षट्को
णेषु आग्नेयकोणादारभ्य प्रागदक्षिण्येन पूजयेत्॥ वन्हि
मूर्त्तयैनमः हृदयं पूजयामी॥ सूर्यमूर्त्तयैनमः शिरः पूज
यामी॥ सोममूर्त्तयैनमः शिखां पूजयामी॥ वायूमूर्त्त
यैनमः कवचं पूजयामी॥ संहर्त्तमूर्त्तयैनमः नेत्रं पूजयामी

विद्युन्मूर्त्तयेनमः अस्त्रं पूजयामी ॥इतिद्वितियावरणं॥चक्र ॥१३॥
स्यदशादळेषु॥धूम्रार्चिषेनमः॥ऊष्मार्चिषेनमः॥रूप्या
यैनमः॥कपिलायैनमः॥हव्यवाहनायैनमः॥कव्यवा
हनायैनमः॥श्रीयैनमः॥सुरूपायैनमः॥ज्वलिन्यैन
मः॥ज्वालिन्यैनमः॥अथतृतीयावरण पूजा॥चक्र
स्यदशादळेषु॥तपिन्यैनमः॥तापिन्यैनमः॥धूम्रायैनमः
मरिच्यैनमः॥ज्वालिन्यैनमः॥रुच्यैनमः॥सुषुम्नायै
नमः॥भोगायैनमः॥विश्वायैनमः॥बोधिन्यैनमः॥

धारिण्यैनमः॥ क्षमायैनमः॥ इतिचतुर्थावरणं॥ चक्रस्य षोडशादळेषु॥ अमृतायैनमः॥ मानदायैनमः॥ पूषायैनमः॥ तुष्टैयनमः॥ पुष्टैयनमः॥ रत्यैनमः॥ धृत्यैनमः॥ शशिन्यैनमः॥ चंद्रिकायैनमः॥ कांत्यैनमः॥ जोत्स्नायैनमः॥ श्रीयैनमः॥ प्रीत्यैनमः॥ अंगदायैनमः पूर्णायैनमः॥ पूर्णामृतायैनमः॥ इति पंचमावरणं॥

चक्रस्य अष्टदळेषु॥ अणिमायैनमः॥ महिमायैनमः॥ गरिमायैनमः॥ लघिमायैनमः॥ प्राप्त्यैनमः॥ प्राकाम्यै-

मन्तु
कल्प
14

नमः॥ ईशात्वायैनमः॥ वशित्वायैनमः॥ इतिषष्ठावरणं॥ चक्र 
स्यद्वार पूजा॥ आग्नेयदळमारभ्य॥ प्रागदक्षिण्येन पूजये
त्॥ भूपूर प्रथमविधिवत् ध्यानम्॥ प्रागाद्यष्टदिक्षु:॥ लो
कपालायैनमः॥ इंद्रायैनमः॥ ईशानायैनमः॥ इतिसप्तमा
वरणं॥ वज्रायुधायैनमः॥ शक्त्यायुधायैनमः॥ दंडायुधायै
नमः॥ खड्गायुधायैनमः॥ पाशायुधायैनमः॥ अंकुशा
युधायैनमः॥ गदायुधायैनमः॥ त्रिशूलायुधायैनमः॥
इति अष्टमावरण पूजांसमर्पयामी॥ अतऊर्ध्वं॥ एवंगुणे

त्यादि शुभ तिथौ मम समस्त शत्रुक्षयार्थे चतुर्दश अस्त्र अ

नुलोम विलोम प्रकारेण जपं कुर्यात् ॥ अथ देवी ध्यानम् ॥

रक्तांबरा रक्त पानी रक्तकेशी महोदरा अग्निज्वाला रौद्र

मुखी घोर दंष्ट्री त्रिलोचनी ॥ दिगंबरी दीर्घ केशी शत्रुमा

या महोदरा एतावै कीर्तिता सर्वे शत्रुमुच्चाटये द्रुतं ॥२॥

शत्रु विध्वंसिनी रौद्री त्रिशिरा रक्त लोचनी एतावै विकृता

घोरा शिघ्र मुच्चाटये द्विषं ॥३॥ दंष्ट्रा कराळ वदनं ज्वाला

माला शिरोरुहं कपाल मौक्तिक धरं रुद्रं मन्युं नमाम्यहं

इति ध्यात्वा ॥ अथ पुनश्चरणमारभेत् ॥ यस्ते मन्यो विधद्वज्र
सायका मम शत्रवः पराजितासो अपनिलयंताम् ॥ सहवो
जः पुष्यति विश्वमानुषक् पराजितासो अपनिलयंताम् ॥
साह्याम दासमार्यं त्वया युजा मम शत्रवः पराजितासो अ
पनिलयंताम् ॥ सहस्कृतेन सहसा सहस्वता मम शत्रवः प
राजितासो अपनिलयंताम् ॥ मन्युरिंद्रो मन्युरेवास देवः
मम शत्रवः पराजितासो अपनिलयंताम् ॥ मन्युर्होता वरु
णो जातवेदाः मम शत्रवः पराजितासो अपनिलयंताम्

मन्युं विशा ईळते मानुषीर्याः मम शत्रवः पराजितासो अ
पनिलयंताम् ।। पाहिनो मन्यो तपसा सजोषाः मम शत्र
वः पराजितासो अपनिलयंताम् अभीहि मन्यो तपसस्त
वीयान् मम शत्रवः पराजितासो अपनिलयताम् ।। तपसा
युजा विजहि शत्रून् मम शत्रवः पराजितासो अपनिलयता
म् ।। अमित्रहा वृत्रहा दस्युहा च मम शत्रवः पराजितासो अ
पनिलयंताम् ।। विश्वा वसून्या भरा त्वन्नः मम शत्रवः परा
जितासो अपनिलयंताम् ।। त्वं हि मन्यो अभिभूत्योजाः

मन्यु
कल्प
16



ममशत्रवः पराजितासो अपनिलयंताम् ॥ स्वयंभूर्भामो अभिमातिषाहः ॥ ममशत्रवः पराजितासो अपनिलयंताम् विश्वचर्षणिसहुरिस्सहावान् ममशत्रवः पराजितासो अपनिलयंताम् ॥ अस्मान्छ्वोजः पृतनासुधेहि ममशत्रवः पराजितासो अपनिलयंताम् ॥ अभागस्सन्नपपरेतो अस्मिन् ममशत्रवः पराजितासो अपनिलयंताम् ॥ तव क्रत्वातविषस्यप्रचेतः ममशत्रवः पराजितासो अपनिलयंताम् ॥ तंत्वामन्यो अक्रतुर्जहीळाहं ममशत्र

वः पराजितासो अपनिलयंताम् ॥ स्वातनूर्बलदेयाय

मेहि मम शत्रवः पराजितासो अपनिलयंताम् ॥ अयंते

अस्म्युपमे ह्यर्वाङ् मम शत्रवः पराजितासो अपनिल

यंताम् ॥ प्रतीचीनस्सहुरे विश्वधायः मम शत्रवः परा-

जितासो अपनिलयंताम् ॥ मन्यो वज्रिं नभिमा माव

वृत्स्व मम शत्रवः पराजितासो अपनिलयंताम् ॥ हनावद

स्यूनृतपो ध्यापेः मम शत्रवः पराजितासो अपनिलयंताम्

अभिप्रेहि दक्षिण तो भवामा मम शत्रवः पराजितासो अ

17

पनिलयंताम् ॥ अथावृत्राणि जंघनावभूरि मम शत्रवः परा-
जितासो अपनिलयंताम् ॥ जुहोमिते धरुणं मध्वो अग्रं मम
शत्रवः पराजितासो अपनिलयंताम् ॥ उभाउपांशोः प्रथ
मापिबावा मम शत्रवः पराजितासो अपनिलयंताम् ॥ त्वया
मन्योसरथमारुजंतः मम शत्रवः पराजितासो अपनिल
यंताम् ॥ हृकृषमाणासो धृषिता मरुत्वः मम शत्रवः परा
जितासो अपनिलयंताम् ॥ तिग्मेषवा आयुधा संशिशा
नाः मम शत्रवः पराजितासो अपनिलयंताम् ॥ अभिप्र
यंतु नरो अग्निरूपाः मम शत्रवः पराजितासो अपनिलयंताम्

अग्निरिव मन्यो त्विषितस्सहस्व मम शत्रवः पराजितासोऽप निलयंताम्॥ सेनानीर्नस्सहुरे हूतयेधि मम शत्रवः पराजितासोऽपनिलयंताम्॥ हत्वाय शत्रून् विभजस्ववेदः मम शत्रवः पराजितासोऽपनिलयंताम्॥ ओजोविमानो विमृधोनुदस्व मम शत्रवः पराजितासोऽपनिलयंताम्॥ सहस्वमन्यो अभिमातिमस्मे मम शत्रवः पराजितासोऽपनिलयंताम्॥ ऋजन्मृणन प्रमृणन्प्रेहि शत्रून मम शत्रवः पराजितासोऽपनिलयंताम्॥

मन्यु कल्पः

18



उग्रंते पाजोनन्वारुरुद्ध्रे मम शत्रवः पराजितासो अपनि
लयंताम् ॥ वशी वशं नयस एक ज त्वं मम शत्रवः पराजि
तासो अपनिलयंताम् ॥ एको बहूनामसि मन्यु वीळितः -
मम शत्रवः पराजितासो अपनिलयंताम् ॥ विशंविशं यु
धये सं शिशाधि मम शत्रवः पराजितासो अपनिलयंताम्
अकृत्त रुक्त्वया युजा वयं मम शत्रवः पराजितासो अप
निलयंताम् ॥ द्युमंतं घोषं विजयायाया कृण्महे मम शत्रवः प
राजितासो अपनिलयंताम् ॥ विजेषकृदिंद्र इवानवब्रवः

ममशात्रवः पराजितासो अपनिलयंताम् ॥ अस्माकं

मन्यो अधिपा भवेहा ममशात्रवः पराजितासो अपनिलयं

ताम् ॥ प्रियं तेनाम सहुरे गृणीमसी ममशात्रवः पराजिता

सो अपनिलयंताम् ॥ विद्मातमुत्सं यतआबभूथ ममशा

त्रवः पराजितासो अपनिलयंताम् ॥ आभूत्या सहजाव-

ज्रसायका ममशात्रवः पराजितासो अपनिलयंताम् ॥

महो बिभर्ष्यभिभूत उत्तारं ममशात्रवः पराजितासो अ

पनिलयंताम् ॥ क्रत्वानो मन्यो सह मेद्येधि ममशात्रवः

पराजितासो अपनिलयंताम् ॥ महाधनस्या पुरुहूत संसृजि मम शात्रवः पराजितासो अपनिलयंताम् ॥ संसृष्टं धनमुभयं समाकृतं मम शात्रवः पराजितासो अपनिलयंताम् अस्मभ्यं दत्तां वरुणश्च मन्युः मम शात्रवः पराजितासो अपनिलयंताम् ॥ भियं दधाना हृदयेषु शत्रवः मम शात्रवः पराजितासो अपनिलयंताम् ॥ पराजितासो अपनिलयंताम् मम शात्रवः पराजितासो अपनिलयंताम् ॥ ५८ ॥

यस्ते मन्यो विधद्वज्र सायका सह ओजः पुष्यति विश्वमा

नुषक् भियंदधानाहृदयेषु मम शत्रवः पराजितासोऽ
पनिलयंताम् ॥ साह्याम मदा समार्यत्वया युजा सहस्क
तेन सहसा सहस्वता भियंदधानाहृदयेषु मम शत्रवः प
राजितासोऽपनिलयंताम् ॥ मन्युरिंद्रो मन्युरेवास
देवो मन्युर्होता वरुणो जातवेदाः भियंदधानाहृदयेषु
मम शत्रवः पराजितासोऽपनिलयंताम् ॥३॥ मन्युं वि
शाईळते मानुषीर्याः पाहिनो मन्यो तपसा सजोषाः भि
यंदधानाहृदयेषु शत्रवः पराजितासोऽपनिलयंताम् ॥४॥

मन्यु
कल्पः
20

अभिहि मन्यो तपसस्तवीयान् तपसायुजा विजहि शत्रून् ॥२०॥
न् भियंदधाना हृदयेषु मम शत्रवः पराजितासो अपनि
लयंताम् ॥५॥ अमित्रहा वृत्रहा दस्युहा च विश्वावसून्
न्याभरा त्वन्नः भियंदधाना हृदयेषु मम शत्रवः पराजिता
सो अपनिलयंताम् ॥६॥ त्वंहि मन्यो अभिभूत्योजाः स्व
यंभूर्भामो अभिमातिषाहाः भियंदधाना हृदयेषु शत्रवः
पराजितासो अपनिलयंताम् ॥७॥ विश्वचर्षणि सहुरि
स्सहावा अस्मान्स्वोजः पृतनासु धेहि भियंदधाना

हृदयेषु मम शत्रवः पराजितासो अपनिलयंताम् ॥८॥
अभागस्सन्नपपरेतो अस्मितवक्रत्वात विषस्य प्रचेतः
भियंदधाना हृदयेषु मम शत्रवः पराजितासो अपनि
लयंताम् ॥९॥ तंत्वा मन्यो अक्रतुर्जिहीळाहं स्वातनू
र्बलदेयाय मेही भियंदधाना हृदयेषु मम शत्रवः परा
जितासो अपनिलयंताम् ॥१०॥ अयंते अस्म्युपमेह्य
र्वाङ् प्रतीचीनस्सहुरे विश्वधायः भियंदधाना हृदयेषु
मम शत्रवः पराजितासो अपनिलयंताम् ॥११॥

मन्यु क. 21

मन्यो वज्रिंन भिमा मावधूस्वह्ननाव दस्यून् ऋतपोघ्यापः भियंदधाना हृदयेषु ममशात्रवः पराजितासो अपनिलयंताम् ॥१२॥ अभिप्रेहि दक्षिणतो भवा मेधावृत्राणि जंघना वभूरी भियंदधाना हृदयेषु मम शात्रवः पराजितासो अपनिलयंताम् ॥१३॥ जुहोमिते धरुणं मध्वो अग्र उभाउपांशोः प्रथमा पिबावा भियंदधाना हृदयेषु ममशात्रवः पराजितासो अपनिलयंताम् ॥१४॥ त्वया मन्यो सरथमारुजंतो हरुषमाणासो धृषिता मरुत्वः भियंद

धाना हृदयेषु मम शत्रवः पराजितासो अपनिलयंताम्

॥१५॥ तिग्मेषव आयुधासंशिशाना अभिप्रियंतु नरो-

अग्निरूपाः भियंदधाना हृदयेषु शत्रवः पराजितासो

अपनिलयंताम् ॥१६॥ अग्निरिव मन्यो द्विषितः सह

स्वा सेनानीर्नस्सहुरे हूतये धि भियंदधाना हृदयेषु मम

शत्रवः पराजितासो अपनिलयंताम् ॥१७॥ हत्वाय श

त्रून् विभजस्व वेद ओजो विमानो विमृधो नुदस्वा भि

यंदधाना हृदयेषु शत्रवः पराजितासो अपनिलयंताम्

॥१८॥

मन्यु
कं·
22

सहस्वमन्यो अभिमातिमस्मे रुजन्मृणन् प्रमृणन् प्रेहि शत्रू
न् भियंदधाना हृदयेषु मम शत्रवः पराजितासो अपनिलयं
ताम् ॥१९॥ उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज
त्वं भियंदधाना हृदयेषु मम शत्रवः पराजितासो अपनिल
यंताम् ॥२०॥ एको बहूनामसि मन्यवीळितो विशंविशं यु
धये सं शिशाधि भियंदधाना हृदयेषु मम शत्रवः पराजिता
सो अपनिलयंताम् ॥२१॥ अकृत्तरुक्त्वया युजा वयं द्यु
मंतं घोषं विजयाय कृण्महे भियंदधाना हृदयेषु मम शत्र

वःपराजितासोअपनिलयंताम्॥२२॥विजेषकृदिंद्रायु
वानवब्रवू अस्माकं मन्यो अधिपा भवेहा भियंदधानाहृ
दयेषु ममशत्रवःपराजितासोअपनिलयंताम्॥२३॥प्रि
यंतेनामसहुरे गृणिमसि विद्मातमुत्सं यतआबभूथ भि
यंदधानाहृदयेषु मम शत्रवःपराजितासो अपनिलयं-
ताम्॥२४॥आभूत्या सहजावज्र सायकासहो बिभर्ष्यभि
भूतउत्तारं भियंदधानाहृदयेषु मम शत्रवःपराजितासो अप
निलयंताम्॥२५॥कृत्वानो मन्यो सह मेध्येधि महाधन

मन्यु
क.
23

स्यपुरुहूत संसृजी भियं दधाना हृदयेषु ममशात्रवः पराजि ॥२३॥
तासो अपनिलयंताम् ॥२६॥ संसृष्टं धनमुभयं समाकृतम
स्मभ्यं दत्तां वरुणश्च मन्युः भियं दधाना हृदयेषु ममशात्रवः प
राजितासो अपनिलयंताम् ॥२७॥ भियं दधाना हृदयेषु श
त्रवः पराजितासो अपनिलयंताम् ॥२८॥ ॥

यस्ते मन्यो विधद्वज्र सायका सहवोजः पुष्यति विश्वमानु
षक् साह्यामदा समार्यं त्वया युजा सहस्कृतेन सहसा
सहस्वता संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च

मन्युः भियंदधाना हृदयेषुमम शत्रवः पराजितासो ऽपनि
लयंताम् ॥१॥ मन्युरिंद्रो मन्युरेवास देवो मन्युर्होतावरु
णो जातवेदाः मन्युं विशाईळते मानुषीर्याः पाहिनो म
न्यो तपसा सजोषाः ससृष्टं धनमुभयं समाकृत मस्मभ्यं
दत्तां वरुणश्च मन्युः भियंदधाना हृदयेषु मम शत्रवः परा
जितासो ऽपनिलयंताम् ॥२॥ अभीहिमन्यो तपसस्त
वीयान् तपसा युजा विजहि शत्रून् अमित्रहा वृत्रहा द
स्युहा च विश्वा वसून्याभरात्वन्नाः संसृष्टं धनमुभयं

मन्यु
कः
24

समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः भियं दधा ॥२४॥
नाहृदयेषु मम शत्रवः पराजितासो अपनिलयं
ताम् ॥३॥ त्वं हि मन्यो अभिभूत्योजास्स्वयंभूर्भामो
अभिमातिषाहः विश्वचर्षणि सहुरिस्सहावानस्मा-
न्स्वोजः पृतनासु धेही संसृष्टं धनमुभयं समाकृत
मस्मभ्यं दत्तां वरुणश्च मन्युः भियं दधानाहृदये
षु मम शत्रवः पराजितासो अपनिलयं ताम् ॥४॥
अभागस्सन्नप परेतो अस्मि तव क्रत्वा तविषस्य

प्रचेतः तंत्वा मन्यो अक्रतुर्जिहिळाहं स्वातनूर्बलदे
यायमेही संसृष्टं धनमुभयं समाकृतमस्मभ्यं द
त्तांवरुणश्च मन्युः भियंदधानाहृदयेषु मम शा
त्रवः पराजितासो अपनिलयंताम् ॥५॥ अयंते
अस्म्युपमेह्यर्वाङ् प्रतीचीनस्सहुरे विश्वधायः मन्यो
वज्रिंनभिमामाववृत्स्वहनावदस्यून्रुतबोध्यापेः
संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तांवरु
णश्च मन्युः भियंदधानाहृदयेषु शात्रवः पराजि

मन्यु
क:
25

तासोअपनिलयंताम् ॥५॥ अभिप्रेहिदक्षिणतो ॥२५॥
भवा मेथावृत्राणि जंघना व भूरी जुहोमिते धरुणं मध्वो
अग्रउभाउपांशुः प्रथमा पिबावा संसृष्टं धनमुभ
यं समाकृत मस्मभ्यं दत्तांवरुणश्च मन्युः भियं
दधाना हृदयेषु मम शत्रवः परा जितासो अपनि
लयंताम् ॥७॥ त्वया मन्यो सरथमा रुजंतो हरुषमा
णासो धृषिता मरुत्वः तिग्मेषवा आयुधा संशिशा
ना अभि प्रियंतो नरो अग्निरूपाः संसृष्टं धनमुभ

यं समाकृत मस्मभ्यं दत्तां वरुणश्च मन्युः भियं द
धानाहृदयेषु मम शत्रवः पराजितासो अपनिल
यंताम् ॥८॥ अग्निरिव मन्यो त्विषितः सहस्वा सेना
नीर्नस्सहुरे हूतयेधिहत्वाय शत्रून् विभजस्ववेद
ओजो विमानो विमृधोनुदस्वा सं सृष्टं धनमुभयं
समाकृत मस्मभ्यं दत्तांवरुणश्च मन्युः भियंदधा
नाहृदयेषु मम शत्रवः पराजितासो अपनिलयं-
ताम् ॥९॥ सहस्व मन्यो अभिमाति मस्मे रुजन्

मृणन् प्रमृणन् प्रेहि शत्रून् उग्रं ते पाजो नन्वा रुरु
ध्रे वशीवशं नयस एकजत्वं संसृष्टं धनमुभयं स
माकृतमस्मभ्यं दत्तां वरुणश्च मन्युः भियं दधा
ना हृदयेषु मम शत्रवः पराजितासो अपनिल
यंताम् ॥१०॥ एको बहूनामसि मन्यवीळितो विशं
विशं युधये संशिशाधि अकृत्तकृत्वया युजा वयं
द्युमंतं घोषं विजयायाया कृणमहे संसृष्टं धनमुभयं
समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः भियंद

यानाहृदयेषु मम शत्रवः पराजितासो अपनि
लयंताम्॥११॥ विजेषकृदिंद्रा युवानवब्रवूवूअ-
स्माकं मन्यो अधिपा भवेहा प्रियंते नाम सहुरे गृणी
मसि विद्मातमुत्सं यतआबभूथ संसृष्टं धनमुभयं
समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः भियंदधाना
हृदयेषु शत्रवः पराजितासो अपनिलयंताम्॥१२
आभूत्यासहजा वज्रसायका सहो बिभर्ष्यभिभूत
उत्तारं कृत्वानो मन्यो सह मेद्ये धि महाधनस्य पुरुहू

मन्यु क: 27

तसंसृजि संसृष्टं धनमुभयं समाकृतमस्मभ्यं द ॥२७॥

त्तां वरुणश्च मन्युः भियं दधाना हृदयेषु शत्रवः पराजि

तासो अपनिलयंताम् ॥१३॥ संसृष्टं धनमुभयं स

माकृतमस्मभ्यं दत्तां वरुणश्च मन्युः भियं दधाना हृद

येषु मम शत्रवः पराजितासो अपनिलयंताम् ॥१४॥

पराजितासो अपनिलयंताम् पराजितासो अपनि

लयंताम् ॥१॥ भियं दधाना हृदयेषु शत्रवः पराजिता

सो अपनिलयंताम् ॥२॥ अस्मभ्यं दत्तां वरुणश्चम

न्युः पराजितासो अपनिलयंताम् ॥३॥ संसृष्टं धन

मुभयं समाकृतः पराजितासो अपनिलयंताम् ॥४

महाधनस्य पुरुहूत संसृजि पराजितासो अपनि

लयंताम् ॥५॥ कृत्वा नो मन्यो सह मेद्येधि पराजि

तासो अपनिलयंताम् ॥६॥ सहो बिभर्ष्यभिभू

तउत्तारं पराजितासो अपनिलयंताम् ॥७॥ आ

भूत्यासहजा वज्रसायका पराजितासो अपनिल

यंताम् ॥८॥ विज्ञातमुत्संयत आबभूथ पराजिता

मन्यु
क॰
28

सो अपनिलयंताम् ॥९॥ प्रियंतेनाम सहुरे गृणीमसी
पराजितासो अपनिलयंताम् ॥१०॥ अस्माकं मन्यो
अधिपाभवेहा पराजितासो अपनिलयंताम् ॥११
विजेषकृदिंद्रा युवानवन्नवः पराजितासो अपनिल
यंताम् ॥१२॥ द्युमंतं घोषं विजयायाकृण्महे पराजि
तासो अपनिलयंताम् ॥१३॥ अकृत्तकृत्त्वयायु
जावयं पराजितासो अपनिलयंताम् ॥१४॥ विशं
विशं युधयेसंशिशाधि पराजितासो अपनिलयंता

म् ॥१५॥ एको बहूनामसि मन्यवीळित: पराजिता

सो ऽपनिलयंताम् ॥१६॥ वशीवशं नयस एक-

जत्वं पराजितासो ऽपनिलयंताम् ॥१७॥ उग्रंते

पायो नन्वारुरुध्रे पराजितासो ऽपनिलयंताम्

॥१८॥ ऋजनमृणन् प्रमृणन् प्रेहिशत्रून् पराजिता

सो ऽपनिलयंताम् ॥१९॥ सहस्व मन्यो अभिमाति

मस्मे पराजितासो ऽपनिलयंताम् ॥२०॥ ओजो

विमानो विमृधो नुदस्वा पराजितासो ऽपनिलयं

मन्यु
क.

29

ताम्॥२१॥ हत्वाय शत्रून् विभजस्व वेदाः पराजितासो
अपनिलयंताम्॥२२॥ सेनानीर्नस्सहुरे हूतयेधि परा
जितासो अपनिलयंताम्॥२३॥ अग्निरिव मन्योद्वि
षितस्सहस्व पराजितासो अपनिलयंताम्॥२४॥
अभिप्रियं तु नरो अग्निरूपाः पराजितासो अपनिल
यंताम्॥२५॥ तिग्मेषव आयुधा संशिशाना पराजि
तासो अपनिलयंताम्॥२६॥ हर्षमाणासो धृषिता म
रुत्वाः पराजितासो अपनिलयंताम्॥२७॥ त्वया

मन्यो सरथमारुजंतः पराजितासो अपनिलयंताम्

॥२८॥ उभाउपांशुः प्रथमापिबावा पराजितासो अप

निलयंताम् ॥२९॥ जुहोमिते धरुणं मध्वो अग्रं परा

जितासो अपनिलयंताम् ॥३०॥ अथावृत्राणी जं

घनाव भूरी पराजितासो अपनिलयंताम् ॥३१॥ अ

भि प्रेहि दक्षिणतो भवामा पराजितासो अपनिल

यंताम् ॥३२॥ हनाव दस्यून् ऋतपोध्यापेः पराजि

तासो अपनिलयंताम् ॥३३॥ मन्यो वज्रिंनभिमा

मन्यु
क.
30

मावबृत्स्वा पराजितासो अपनिलयंताम्॥३४॥ ॥३०॥

प्रतीचीनस्सहुरे विश्वधायः पराजितासो अपनिलयं

ताम्॥३५॥ अयंते अस्म्युपमेह्यर्वाङ् पराजितासो

अपनिलयंताम्॥३६॥ स्वानन्नूर्बलदेयाय मेहि प

राजितासो अपनिलयंताम्॥३७॥ तंत्वामन्यो अक्र

तुर्जहीळाहं पराजितासो अपनिलयंताम्॥३८॥ तव

क्रत्वा तविषस्य प्रचेताः पराजितासो अपनिलयं

ताम्॥३९॥ अभागस्सन्नपपरेतो अस्मिन् पराजि

तासो अपनिलयंताम् ॥४०॥ अस्मान्स्वोजः पृतना
सुघेहि पराजितासो अपनिलयंताम् ॥४१॥ विश्वचर्ष
णि सहुरिस्सहावान् पराजितासो अपनिलयंताम्
॥४२॥ स्वयंभूर्भामो अभिमातिषाहः पराजितासो
अपनिलयताम् ॥४३॥ त्वंहि मन्यो अभिभूत्यो
जाः पराजितासो अपनिलयंताम् ॥४४॥ विश्वा
वसून्याभरा त्वन्नाः पराजितासो अपनिलयंता
म् ॥४५॥ अमित्रहावृत्रहा दस्युहाच पराजितासो

अपनिलयंताम् ॥४६॥ तपसा युजा वि जहि शत्रून् पराजितासो अपनिलयंताम् ॥४७॥ अभीहि मन्यो तपसस्तवीयान् पराजितासो अपनिलयंताम् ॥४८॥ पाहि नो मन्यो तपसा सजोषः पराजितासो अपनिलयंताम् ॥४९॥ मन्युं विश ईळते मानुषीर्याः पराजितासो अपनिलयंताम् ॥५०॥ मन्युर्होता वरुणो जातवेदाः पराजितासो अपनिलयंताम् ॥५१॥ मन्युरिंद्रो मन्युरेवास देवाः पराजितासो अपनिल

यंताम् ॥५२॥ सहस्कृतेनसहसा सहस्वता:परा

जितासोअपनिलयंताम् ॥५३॥ साह्यामदा

समार्यंत्वयायुजा पराजितासोअपनिलयं-

ताम् ॥५४॥ सहवोजः पुष्यति विश्वमानुषक्

पराजितासोअपनिलयंताम् ॥५५॥ यस्ते म

न्यो विधद्वज्रसायका पराजितासोअपनिलयं

ताम् ॥५६॥ ॥ ॥

भियंदधानाहृदयेषुशत्रवः पराजितासोअपनिल

मन्यु
कः
32

यंताम भियंदधानाहृदयेषुशत्रवः पराजितासो अ ॥३२॥
पनिलयंताम ॥१॥ संसृष्टं धन मुभयं समाकृतम
स्मभ्यं दत्तां वरुणश्च मन्युः भियंदधानाहृदयेषुश
त्रवः पराजितासो अपनिलयंताम ॥२॥ कत्वानो
मन्यो सह मेद्ध्येधि महा धनस्य पुरुहूत संसृजि भि
यंदधानाहृदयेषुशत्रवः पराजितासो अपनिल
यंताम ॥३॥ आभूत्या सहजा वज्रसायका सहोबि
भर्ष्यभि भूतउत्तारं भियंदधानाहृदयेषुशत्रवः परा

जितासो अपनिलयंताम् ॥४॥ भियंतेनाम सहुरेगृ-

णीमसि विद्मातमुत्सं यतआबभूथ भियंदधाना

हृदयेषु शत्रवः पराजितासो अपनिलयंताम् ॥५॥

विजेषकृदिंद्रा युवानवब्रवू अस्माकं मन्यो अधि

पाभवेहा भियंदधाना हृदयेषु शत्रवः पराजितासो

अपनिलयंताम् ॥६॥ अकृत्तकृत्वया युजावयं

द्युमंतंघोषं विजयायाकृण्महे भियंदधाना हृदयेषु

शत्रवः पराजितासो अपनिलयंताम् ॥७॥ एको

मन्यु
क·
33

॥३३॥

बहूनामसि मन्यवीळितो विशंविशं युधये संशिशाधि
भियं दधाना हृदयेषु शत्रवः पराजितासो अप निलयं
ताम् ॥८॥ उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस
एकज त्वं भियं दधाना हृदयेषु शत्रवः पराजितासो
अप निलयंताम् ॥९॥ सहस्व मन्यो अभिमाति
मस्मे रुजन् मृणन् प्रमृणन् प्रेहि शत्रून् भियं दधा
ना हृदयेषु शत्रवः पराजितासो अप निलयंताम्
॥१०॥ हत्वाय शत्रून् विभजस्व वेद ओजो विमा

नो विमृधो नुदस्वा भियं दधाना हृदयेषु शत्रवः प

राजितासो अप निलयंताम् ॥११॥ अग्निरिव मन्यो

त्विषितस्सहस्वा सेनानीर्नस्सहुरे हूतये धि भियं दधा

ना हृदयेषु शत्रवः पराजितासो अप निलयंताम् ॥१२

तिग्मेषव आयुधा संशिशाना अभि प्रियंतु नरो

अग्निरूपाः भियं दधाना हृदयेषु शत्रवः पराजिता

सो अप निलयंताम् ॥१३॥ त्वया मन्यो सरथमारु

जंतो हर्षमाणा सो धृषिता मरुत्वाः भियं दधाना हृ

मन्यु
क:
34

॥३४॥

दयेषुशात्रवपराजितासोअपनिलयंताम्॥१४॥जुहो
मितेधरुणंमध्वोअग्रउभाउपांशुःप्रथमापिबावाभि
यंदधानाहृदयेषुशात्रवःपराजितासोअपनिलयंताम्
॥१५॥अभिप्रेहिदक्षिणतोभवामेधावृत्राणिजंघना
वभूरीभियंदधानाहृदयेषुशात्रवःपराजितासोअप
निलयंताम्॥१६॥मन्योवज्रिंनभिमामाववृत्स्वह
नावदस्यून्नृतपोध्यापेःभियंदधानाहृदयेषुशात्रवः
पराजितासोअपनिलयंताम्॥१७॥अयंतेअस्म्यु

पमेह्यर्वाङ् प्रतीचीनस्सहुरे विश्वधायाः भियंदधा

नाहृदयेषु शत्रवः पराजितासो अपनिलयंताम् ॥१८

तं त्वा मन्यो अक्रतुर्जिहीळाहं स्वा तनूर्बलदेयाय

मेहि भियंदधानाहृदयेषु शत्रवः पराजितासो अप-

निलयंताम् ॥१९॥ अभागस्सन्नप परेतो अस्मिन त

वक्रत्वात विषस्य प्रचेतः भियंदधानाहृदयेषु शत्र

वः पराजितासो अपनिलयंताम् ॥२०॥ विश्वचर्षणि

सहुरिस्सहावान् अस्मान्त्स्वोजः पृतनासु धेहि भियं

मन्यु
कः
35

दधानाहृदयेषुशत्रवः पराजितासो अपनिलयंताम् ॥२१ ॥३५॥

त्वंहिमन्यो अभिभूत्योजास्वयंभूर्भामो अभिमाति
षाहः भियंदधानाहृदयेषुशत्रवः पराजितासो अप
निलयंताम् ॥२२॥ अमित्रहावृत्रहादस्युहाच विश्वा
वसून्याभरात्वन्नः भियंदधानाहृदयेषुशत्रवः परा
जितासो अपनिलयंताम् ॥२३॥ अर्म्मोहिमन्योतप
सस्तवीयान्तपसायुजाविजहिशत्रून् भियंदधाना
हृदयेषुशत्रवः पराजितासो अपनिलयंताम् ॥२४॥

मन्युंविशाईळते मानुषीर्याः पाहिनो मन्योतपसास
जोषाः भियंदधानाहृदयेषुशत्रवः पराजितासोअ
पनिलयंताम् ॥२५॥ मन्युरिंद्रो मन्युरेवासदेवोम
न्युर्होतावरुणोजातवेदाः भियंदधानाहृदयेषुशत्रवः
पराजितासोअपनिलयंताम् ॥२६॥ साह्यामदा
समार्यंत्वयायुजा सहस्कृतेन सहसासहस्वताभि
यंदधानाहृदयेषुशत्रवः पराजितासोअपनिलयंता
म् ॥२७॥ यस्तेमन्योविधद्वज्रसायका सहओजः

मन्यु क·

पुष्यति विश्वमानुषक् भियंदधानाहृदयेषु शत्रवः परा ॥३६॥
जितासो अपनिलयंताम ॥२८॥ ॥ ॥

५६ 36

संसृष्टंधनमुभयंसमाकृतमस्मभ्यंदत्तांवरुणश्च मन्युः
भियंदधानाहृदये शत्रवः पराजितासो अपनिलयंता
संसृष्टं धनमुभयं समाकृत
म ॥१॥ आभूत्या सहजावज्र सायका सहो बिभ-
र्ष्यभिभूत उत्तारं कृत्वानो मन्यो सह मेद्ये धि महाध
नस्य पुरुहूत संसृजि संसृष्टंधनमुभयंसमाकृतम
स्मभ्यंदत्तांवरुणश्च मन्युः भियंदधानाहृदयेषुशत्र

वः पराजितासो अपनिलयंताम् ॥२॥ विजेषकृदिं
द्रा युवानवब्रवूब्रू अस्माकं मन्यो अधिपा भवेहाप्रि
यंते नाम सहुरे गृणीमसि विद्मात मुत्संयत आबभू
थ संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुण्श्र
मन्युः भियं दधाना हृदयेषु शत्रवः पराजितासो अप
निलयंताम् ॥३॥ एको बहूनामसि मन्यवीळितो वि
शं विशं युधये सं शिशाधि अकृत्तरुक्त्वया युजाव
यं द्युमंतं घोषं विजयाय कृण्महे संसृष्टं धनमुभ

मन्यु
क.
37

यंसमाकृतमस्मभ्यंदत्तांवरुणश्चमन्युः भियंदधाना ॥३७॥
हृदयेषुशत्रवःपराजितासोअपनिलयंताम्॥४॥स
हस्वमन्योअभिमातिमस्मे रुजन्मृणन्प्रमृणन्
प्रेहिशत्रून्उग्रंतेपाजोनन्वारुरुध्रेवशीवशंनय
सएकजत्वंसंसृष्टंधनमुभयंसमाकृतमस्म
भ्यंदत्तांवरुणश्चमन्युः भियंदधानाहृदयेषुश
त्रवःपराजितासोअपनिलयंताम्॥५॥अ
ग्निरिवमन्योत्विषितःसहस्वसेनानीर्नस्सहु

रेहूतयेघिहत्वायशत्रून् विभजस्ववेद ओजो
विमानो विमृघोनुदस्वा संसृष्टंधनमुभयंसमा
कृतमस्मभ्यंदत्तांवरुणश्चमन्युःभियंदधा
नाहृदयेषुशत्रवःपराजितासोअपनिलयं·
ताम् ॥ ५॥ त्वयामन्योसरथमारुजंतोहर्षमा
णासोधृषितामरुत्वः तिग्मेषव आयुधासंशि
शानाअभिप्रयंतुनरोअग्निरूपाःसंसृष्टंध
नमुभयंसमाकृतमस्मभ्यंदत्तांवरुणश्चमन्युः

मन्यु क. 38

भियं दधाना हृदयेषु शत्रवः पराजितासो अपनिल ॥३८॥
यंताम् ॥७॥ अभि प्रेहि दक्षिणतो भवा मेधा वृत्रा
णि जंघनाव भूरि जुहोमि ते धरुणं मध्वो अग्र उ
भा उपांशु प्रथमा पिबावा संसृष्टं धन मुभयं
समाकृत मस्मभ्यं दत्तां वरुणश्च मन्युः भियं द-
धाना हृदयेषु शत्रवः पराजितासो अपनिलयं
ताम् ॥८॥ अयं ते अस्म्युप मेह्यर्वाङ् प्रतीचीनस्स
हुरे विश्वधायः मन्यो वज्रिन्नभि मामावव्रृत्स्वह

नावदस्यूनृतयोध्याये: ससृष्टं धनमुभयंसमा
कृतमस्मभ्यंदत्तांवरुणश्च मन्युः भियंदधाना
हृदयेषु शत्रवः पराजितासो अपनिलयंताम्
॥९॥ अभागस्सन्नपपरेतो अस्मि तवक्रत्वा तवि
षस्य प्रचेतः तंत्वा मन्यो अक्रतुर्जिहीळाहं स्वात
नुर्बलदेयायमहि संसृष्टं धनमुभयंसमाकृतम
स्मभ्यंदत्तांवरुणश्च मन्युः भियंदधाना हृदयेषुश
त्रवः पराजितासो अपनिलयंताम् ॥१०॥ त्वंहि मन्यो

मन्यु क.

39

अभिभूत्योजास्स्वयंभूर्भामो अभिमातिषाहः विश्वच ॥३९॥
र्षणिस्सहुरिस्सहावानस्मास्वोजः पृतनासु धेहि संसृ
ष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः
भियं दधाना हृदयेषु शत्रवः पराजितासो अपनि
लयंताम् ॥११॥ अभि हि मन्यो तपसस्तवीयान्त
पसा युजा वि जहि शत्रून् अमित्रहा वृत्रहा दस्यु
हा च विश्वा वसून्या भरा त्वन्नाः संसृष्टं धनमुभयं
समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः भियं दधाना

हृदयेषु शत्रवः पराजितासो अपनिलयंताम्॥१२

मन्युरिंद्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः

मन्युं विशाईळते मानुषीर्याः पाहिनो मन्यो तपसास

जोषाः संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तांव

रुणश्च मन्युः भियंदधाना हृदयेषु शत्रवः पराजि

तासो अपनिलयंताम्॥१३॥ यस्ते मन्यो विध

द्वज्रसायका सहवोजः पुष्यति विश्वमानुषक्

साह्यामदासमार्यंत्वया युजा सहस्कृतेन सहसास

मन्यु
कः
40

हस्वता संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च ॥४०॥

मन्युः भियं दधाना हृदयेषु शत्रवः पराजितासो अपनिल

यंताम् ॥१४॥ ॥ ॥ ॥

पुनः एकवारं मन्युसूक्तं पठेत् ॥ जपसंख्याः तद्दशां

शभाग होमः तद्दशांशभाग क्षीर गंध पुष्प तिल

अक्षतादूर्वांकुर सहित तर्पणं कुर्यात् ॥ कलशस्य

दक्षिणभागे होमार्थ कुंडं परिकल्प्य गोमयेनोपलि

प्य ॥ रंगवल्यादिन रचयित्वा ततः पश्चिमदिग्भा

गे आचार्यः उपविश्य॥ पूर्वोक्त शुभतिथौ मम सर्व
तोरक्षणार्थे समस्त शत्रुनिबर्हणार्थे मन्युदेवतामु
द्दिश्य मन्युदेवताप्रित्यर्थं पुनश्चरणांग होमं कर्तुं
स्थंडिलेलेखनाद्यग्नि प्रतिष्ठापनं करिष्ये इति संकल्प्य
अन्वाधानं करिष्ये अग्नि प्रतिष्ठापनादि करिष्ये॥
मन्युदेवतायै इति आज्येन मन्युसूक्त चतुर्दश अस्रैः
चरु समिधाज्य व्रीही तिलद्रव्यैश्च चक्षुष्यंतं कृत्वा
मन्युसूक्त चतुर्दश ऋग्भिः तर्पणं कृत्वा॥ होमदशां

मन्यु क·

५१

शं स्विष्टकृत्तादिहोमशेषंसमाप्य॥ आचार्यसहितसर्वा

ऋत्विग्भ्यः वस्त्रकुंडल छत्र पादुका अंगुल्याभरणहि

रण्य तांबूल दक्षिणादिभिः संपूज्य॥ आचार्यस्यक

लशवस्त्र प्रतिमादानंकृत्वा॥ दशदानानिकृत्वा॥

होमदशांशब्राम्हण भोजनंकुर्यात्॥ आदौशरीराशु

द्धीनिवर्तयेत्॥ पुण्यदेवायतने नदीतीरे ग्रामाद्वहि

र्वा शुचौदेशे पुनश्चरणंकुर्यात्॥ महाशत्रु पराजया

र्थेद्वादशलक्षंमंत्र पुनश्चरणं॥ एकलक्ष चतुर्दशाक्ष

ग्भिः पारायणं ।। मध्यम शत्रु पराजयार्थे द्वादश सहस्त्रं
जपेत् द्विसहस्त्र पारायणं ।। सामान्य शत्रुपराजयार्थे
द्वादश शतं जपेत् द्वादश शतं पारायणं इतिस्पष्टः ।। तद
नंतरं मूर्त्तिध्यानं सूक्तेनस्तोत्र मित्यर्थः ।। बिभीतिक-
स्यवा खादिरस्य वा शंकुना प्रतिरुच्यं हुत्वा इध्मावृ
क्ष विशेषं राजवश्यार्थे स्वयं मंत्र पुनश्चरणे स्वगृहमध्ये
द्वादश लक्ष पुनश्चरणं अन्यकृत्वा पुण्यक्षेत्रे सती ।।
दुष्टशत्रुकृत्य परिहारार्थे स्वगृहमध्ये जपेत् नदीतीरे

मन्यु
क.

42

पुनश्चरणं औदुंबर इध्मः पंचखादरैर्होमः ॥ महाशत्रुप ॥४२॥

राभवार्थे दुग्धेन तर्पणं ॥ चरू तिल श्वेतसर्षप होमः ॥ म

हारोग पराभवार्थे एतदुक्तं ॥ महारोगान् मुक्तो भवती

गृह पीडा निवृत्यर्थे सहस्त्रं जपेत् एतत्संख्या पारायणं

अर्कसमिधैर्होमः आज्य आहुती दुग्धतर्पणं ॥ जप

मृत्यु परिहारार्थं एकादशादिन पुनश्चरणं सहस्त्र ऊर्ध्वं

शतं पारायणं एकोत्तरवृद्धि जपं कपिलाज्यदधिभि

श्च होमः महाराज प्रसीदत् ॥ त्रिमधुर फुलैः हरिद्रा

खंडैः गुग्गुलेन इक्षुखंडै र्वा होमः अतिमित्रखता
सिद्धिः शतोत्तर अष्टाविंशतिबलिं दद्यात् ॥ तेन
राज्यं प्रसीदती ॥ इति श्रीरुद्रयामिले स्वरघट
तंत्रे मन्युसूक्त विधान नाम पंचदशः पटलः एवं वि
नियोगदीपिकायां द्वादशः पटलः ॥ यह ग्रंथ अ
ति गोप्य रहस्य है और शुद्ध है इस वास्ते कापीक
र्नै की जरूर नही स्वतः अनुष्ठान कर्नै से शीघ्र फ
ल. और मनुष्य की गर्ज नही स मंत्र कै है ॥ बलवंते

मन्यु
कः

न लिखितं॥ नित्यं एकावृत्ती पारायणं अष्टोत्तरशत ॥४३॥

मूलमंत्रजपं त्रिरावृत्तीं कुर्यात्॥ श्रीबालात्रिपुरसुं

दरीदेवतार्पणमस्तु॥ शुभं भवतु॥

43







शाके १८०९ सर्वजिन्नामसंवत्सरे उत्तरायणे वसंत

ऋतौ वैशाखमासे कृष्णपक्षे १२ गुरुवासरः ते

दिने बाणारग्रामे ग्रंथ लिखिता.

